# संस्कृतवार्ता:

दिनाङ्क :- 15.05.2025 सायम् :- 06:20

<u>आदौ-मुख्यवार्ता:</u>

- विदेश-मन्त्रिणा डॉ. एस.जयशङ्करेण अद्य नवदिल्ल्याम् भारत-पाकिस्तानयोः मध्ये संवादाय कस्यापि तृतीय-पक्षस्य मध्यस्थता निराकृता ।
- रक्षामन्त्रिणा राजनाथ-सिंहेन सिन्दूराभियानस्य सफलतायां सशस्त्र-बलानि वर्धापितानि। तेनोक्तं यत् पाकिस्तानस्य हस्तयोः परमाणु अस्त्रं सुरक्षितं नास्ति, आई.ए.ई.ए. इति अन्ताराष्ट्रिय-परमाणु ऊर्जाभिकरणेन एतत् स्वस्य निरीक्षणे स्वी-कर्तव्यतम्।
- जम्मू-कश्मीरस्य पुलवामा-जनपदस्य नादर-गांव इत्यत्र सुरक्षा-बलैः सह सङ्घर्षे त्रयः आतङ्कवादिनो व्यापादिताः।
- राष्ट्रपतिः द्रौपदी मुर्मुः तमिलनाडु-विधेयक-प्रकरणे सर्वोच्च-न्यायालयस्य निर्णयानन्तरं न्यायालयात् प्रश्नान् अपृच्छत्।
- खेलो इंडिया यूथ गेम्स इति युव-क्रीडा-महोत्सवस्य समापन-समारोहः अद्य पटना नगरे आयोजयिष्यते।

---

<u>जयशङ्करः पाकिस्तानम्</u>

विदेश-मन्त्रिणा डॉ. एस.जयशङ्करेण अद्य नवदिल्ल्याम् भारत-पाकिस्तानयोः मध्ये संवादाय कस्यापि तृतीय-पक्षस्य मध्यस्थता निराकृता । उक्तं च यत् पाकिस्तानेन सह कस्मिन् अपि विषये संवादः केवलं द्विपक्षीयाधारेण एव भविष्यति। राजधान्यां नवदिल्याम् एकस्मिन् वार्ताहर-सम्मेलने सम्बोधयन् विदेशमन्त्री अवोचत् यत् पाकिस्तानेन सह अवशिष्ट-विषयेषु केवलं तेनाधिकृत-भारतीय-कश्मीर-क्षेत्रस्य विमोचनम् एव वर्तते।

विदेशमन्त्री सबलम् अवोचत् यत् वर्षेभ्य: अयं राष्ट्रिय-सहमते: विषय: वर्तते। भारतस्य दृष्टिकोणे किमपि परिवर्तनं नैव आगतम्। तेन उक्तं यत् पाकिस्तानेन सह संवाद: केवलम् आतङ्कवाद-विषये एव भविष्यति। मन्त्रिणा उक्तं यत् पाकिस्तानाय तेषाम् आतिङ्कनां सूचि: प्रदत्ता ये तेन भारताय समर्पणीया: सन्ति।

विदेशमन्त्री अवोचत् यत् सिन्धु जल सन्धि: तावत् स्थगिता भविष्यति यावत् पाकिस्तानं पारेसीम्न: आतङ्कवादे विश्वसनीयम् अवरोधं नैव स्थापष्यति। अमेरीकया सह व्यापार-विषये तेनोक्तं यत् संवादो विधीयते। कापि व्यापार सन्धि: देशद्वयाय लाभ-दायिका स्यात्। भारतस्य इयमेव अपेक्षा वर्तते।

---------------------------------------------------

<u>रक्षामन्त्री जम्मूकश्मीरयात्रा</u>

रक्षामन्त्री राजनाथसिंहः अवोचत् यत् सिन्दूराभियानम् विगतेभ्यः दशकेभ्यः पाकिस्तानात् अथ पाकिस्तानाधिकृत-कश्मीरात् प्रसृतातङ्क-वादं विरुध्य भारतस्य कठोर-कार्याचरणं वर्तते। रक्षामन्त्री अद्य श्रीनगरे सैनिकान् सम्बोधयन् सिन्दूराभियानस्य सफलतायै भारतीयसेनायाः शौर्यं कुशलतापूर्वकं विहतं कार्याचरणं च श्लाघितवान्। अमुनोक्तं यत् राष्ट्रं तेषां शौर्ये सङ्कल्पे समर्पणे च गौरवमनुभवति।

रक्षामन्त्रिणा उक्तं विश्वेन दृष्टं यत् कथं पाकिस्तानेन भारतं विरुध्य दायित्वरहितम् आचरणं विहितम्। तेनोक्तं यत् पाकिस्तानस्य हस्तयोः परमाणु अस्त्रं सुरक्षितम् नास्ति। अथ च पाकिस्तानस्य परमाणु अस्त्रं अन्ताराष्ट्रिय परमाणु ऊर्जाभिकरणेन स्वस्य निरीक्षणे स्वीकर्तव्यम्।

अवधेयमस्ति यत् सिन्दूराभियानस्य आरम्भानन्तरं रक्षामन्त्रिणः राजनाथ-सिंहस्य प्रथमेयं जम्मू-कश्मीर-यात्रा वर्तते। पहलगाम-स्थाने अप्रैल-मासस्य द्वाविंशतिः दिनांके दुरापन्नस्य आतङ्क्याक्रमणस्य प्रत्युत्तरे सिन्दूराभियानस्य अन्तर्गतं पाकिस्ताने अथ पाकिस्तानाधिकृत-कश्मीरे आङ्क-शिबिराणि लक्ष्यीकृतानि। अत्रावसरे राज्यपालः मनोजसिन्हा मुख्यमन्त्री उमर-अब्दुल्ला सैन्यप्रमुखः जनरल-विपिन-द्विवेदी अन्ये च वरिष्ठा सैन्याधिकारिणः उपस्थिताः अवर्तन्त ।

---------------------------------------------------

राष्ट्रपतिः तमिलनाडु विधेयकम्

तमिलनाडु-विधेयक-प्रकरणे सर्वोच्च-न्यायालयस्य निर्णयानन्तरं राष्ट्रपतिः द्रौपदी मुर्मुः न्यायालयात् प्रश्नान् अपृच्छत्। तयोक्तं यत् संविधाने निर्धारित-समय-सीमायाः व्यवस्था न विद्यते सत्यपि विधेयकानां स्वीकृतये राज्यपालेभ्यः समय-सीमा निर्धारिता भवितुं शक्यते न वा? संविधानस्य त्रिचत्वारिंशदुत्तरैकशततमस्य अनुच्छेदस्य प्रथम-भागस्य अन्तर्गतं राष्ट्रपतिं प्रति विधि-लोक-महत्वस्य विषयेषु सर्वोच्च-न्यायालयस्य परामर्शाधिकारो वर्तते। राष्ट्रपतिना मुर्मु-वर्यया चतुर्दश-प्रश्नेषु न्यायालयस्य अभिमतं पृष्टम्। अस्मिन् उक्तं यत् संविधानस्य द्विशतम् एकोत्तर-द्विशतम् अनयोः अनुच्छेदयोः राज्यपालैः राष्ट्रपतिना च विधेयकानां स्वीकृतेः प्रक्रिया निर्धारिता विद्यते तस्याः अन्तर्गतं कस्याः अपि समय-सीमायाः विशेष-प्रक्रियायाः सम्बद्धावश्यकतानाम् उल्लेखो न वर्तते।

राष्ट्रपतिना शीर्ष-न्यायालयः प्रोक्तं यत् संविधानस्य द्विशतानुच्छेदस्य अन्तर्गतं यदा राज्यपालं प्रति विधेयकानुमोदनाय प्रेष्यते तदा तस्य पार्श्वे कः सांवैधानिकः विकल्पो भवति । एतदतिरिच्य इदमपि पृष्टं यत् यदि विधेयकेषु राज्यपालैः संविधानस्य अनुसारं स्वीकृतः निर्णयः न्यायसंगतः भवेत् तदा संविधानस्य एकषष्टधिकत्रिशतम् अनुच्छेदस्य अन्तर्गतं तेषां निर्णयेषु कदा न्यायिक-समीक्षा पूर्णता अवरोद्धुं शक्यते। राष्ट्रपतिना मुर्मु इत्यनया सर्वोच्च-न्यायालयस्य तस्मिन् निर्देशे प्रश्नोत्थापितः यस्मिन् उक्तमस्ति यत् विधेयकेषु निर्धारितावधौ स्वीकृतिः न प्रदानस्य स्थितौ तत् विधेयकं स्वतः स्वीकृतम् इति मन्यते ।

---

कुपवाडायामातङ्किनो व्यापादिताः

जम्मू-कश्मीरस्य पुलवामा-जनपदस्य नादर-गांव इत्यत्र सुरक्षा-बलैः सह सङ्घर्षे त्रयः आतङ्कवादिनो व्यापादिताः। अयं सङ्घर्षः प्रातः एव आरब्धः। कश्मीरस्य आरक्षि महानिदेशकः वी.के.बिरदी इत्येषः आकाशवाण्या सह संवादे अवोचत् यत् आभियानावधौ त्रयः आततायिनः व्यापादिताः। घटनास्थलात् तेषां शरीराणि गृहीतानि।

---

मणिपुरे दशोग्रवादिनो व्यापादिताः

भारतीय-सैन्य-बलेन मणिपुरस्य चन्देल-जनपदे सन्दिग्धोग्रवाद-समूहस्य दश-सदस्याः व्यापादिताः। पूर्व-भागस्थेन सैन्यबलेन एकस्मिन् सामाजिक-सञ्चार-पटले प्रोक्तं यत् विशेष-गोपनीय-प्रतिवेदनाधारेण सैन्यदलेन क्षेत्रे एकम् अभियानम् आरब्धम्। अभियानावधौ उग्रवादिभिः सैन्यबले प्रहारो विहितः प्रत्युत्तरिते गोलिका-प्रहारे दशोग्रवादिनः व्यापादिताः। ततः सेनया बृहन्मात्रायाम् अस्त्राणि विस्फोटकानि च प्राप्तानि। इम्फाल-नगरात् अस्माकं वार्ताहरेण सूचित यत् कार्याचरणम् इदानीम् अपि प्रवर्तते।

---------------------------------------------------

<u>बुद्ध-शेखावत-</u>

संस्कृतिपर्यटनमन्त्री गजेन्द्रसिंह शेखावतः अद्य उक्तवान् यत् वैशाखाबुद्धपूर्णिमा सभ्यतागतोत्सवः अस्ति, न तु केवलं धार्मिकोत्सवः। नवदिल्ल्याम् उत्सवे प्रवदन् सः प्रतिपादितवान् यत् बौद्धाः आदर्शाः सार्वत्रिकसत्याः च सन्ति। इमे विश्वे कोटिशः जनानाम् मध्ये प्रतिध्वनिताः सन्ति। मन्त्रिणा उक्तं यत् भगवतः बुद्धस्य रिक्थेषु पवित्रस्थलानि शिक्षायाः वैश्विकप्रसारः च अन्तर्भवति । भारते प्रादुर्भूतस्य भगवतः बुद्धस्य सन्देशैः सम्पूर्णेपि एशियायां शान्तिं जागरणं च आगते इति मन्त्री अवदत्। सः अवदत् यत् कला, वास्तुकला, अन्ताराष्ट्रियसंवादेन एतेषां रिक्थानां संरक्षणाय प्रचाराय च सर्वकारः प्रतिबद्धः अस्ति।

अस्मिन् अवसरे प्रवदन् अल्प-संख्यक-कार्याणां मन्त्री किरेन् रिजिजुः अवदत् यत् बुद्धस्य शिक्षाः धर्मात् परम्, तेषामनुसरणं प्रत्येकस्य भारतीयस्य कर्तव्यम् अस्ति। सः अवदत् यत् भारते सप्तसमुदायाः शान्तिप्रतीकाभ्यां रूपेण बुद्धं पूजयन्ति।

---------------------------------------------------

<u>खेलो इण्डिया</u>

खेलो इंडिया यूथ गेम्स इति युवक्रीडामहोत्सवः अद्य सम्पन्नतां याति। समापन-समारोहः बिहारस्य पटना-नगरे कङ्कड़-बागस्थे पाटलिपुत्र-क्रीडा- परिसरे अद्य सायं आयोजयिष्यते। पदक-तालिकायां नवचत्वारिंशदुत्तरैकशतं पदकैः सह महाराष्ट्रं शीर्षस्थं वर्तते। सप्तोत्तरैकशतं पदकैः सह हरियाणा द्वितीये स्थाने पञ्च-पञ्चाशत् पदकानि विजित्य राजस्थानं तृतीये स्थाने

वर्तते। केन्द्रीय-युवप्रकरण-क्रीडा-राज्यमन्त्री रक्षा-निखिल-खड़से अथ बिहारस्य उपमुख्यन्त्री सम्राट-चौधरी अन्ये च गणमान्याः अस्मिन् समापन-समारोहे उपस्थिताः भविष्यन्ति।

।। इति वार्ता: ।।